09-06-2021

शास्त्री II

अनिवार्यपत्रम् ।

व्याकरणछात्रहेतु: । साहित्यम् । रघुवंशम् । श्लोकव्याख्या ।

"तस्याः प्रकामं प्रियदर्शनोऽपि न स क्षितीशो रुचये बभूव ।
शरत्प्रमृष्टाम्बुधरोपरोधः शशीव पर्याप्तकलो नलिन्याः ॥"

सन्दर्भः → प्रस्तुतमिदं पद्यं महाकविकालिदासप्रणीतस्य रघुवंशमहाकाव्यस्य षष्ठसर्गादिन्दुमतीवर्णनप्रसङ्गादुद्धृतमस्ति ।

प्रसङ्गः → कविरत्र प्रतीपं राजानं प्रति इन्दुमत्याः निःस्पृहभावं सोपमं प्रस्तौति ।

अन्वयः → प्रकामं प्रियदर्शनः अपि स क्षितीशः शरत्प्रमृष्टाम्बुधरोपरोधः पर्याप्तकलः शशी नलिन्याः इव तस्याः रुचये न बभूव ।

शब्दार्थः व्याकरणञ्च → प्रकामम् = अभीष्टम् । प्रियदर्शनः - प्रियं दर्शनं यस्य सः = प्रियकरः, शोभनदर्शनं । अपि = च । सः = प्रतीपः नामकः राजा । क्षितीशः → क्षिति + ईशः = राजा, नृपः । शरत्प्रमृष्टाम्बुधरोपरोधः → शरदा प्रमृष्टा अम्बुधराणाम् उपरोधः = शरदृतुनिरस्तजलदावरणः । पर्याप्तकलः = पूर्णकलः । शशी = इन्दुः । नलिन्याः = कमलिन्याः । इव = यथा । तस्याः = इन्दुमत्याः । रुचये = प्रीतये । बभूव = जातः ।

तात्पर्यः → राजा प्रतीपः प्रियकरोऽपि इन्दुमत्याः तथैव सन्तोषाय न जातः यथा शरत्कालीनपूर्णचन्द्रः कमलिन्या न रोचते ।

विशेषः → अस्मिन् श्लोके शृङ्गाररसः, वैदर्भी रीतिः, प्रसादगुणः, उपमालङ्कारः, उपजातिवृत्तिश्च ।

09-06-2021

डॉ० निर्मलकुमार झा, (स० प्राचार्य) ।
रा० उ० सं० महावि० सुरवसेना, पूर्णियाँ ।

09-06-2021

उपशास्त्री

हितोपदेशे मित्रलाभः ।

अनिवार्यपत्रम् । संस्कृत सामान्यम् ।

श्लोकव्याख्या →

"उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीर्दैवेन देयमिति कापुरुषा वदन्ति। दैवं निहत्य कुरु पौरुषमात्मशक्त्या, यत्ने कृते यदि न सिद्ध्यति, कोऽत्र दोषः ॥"

श्लोकोऽयं महाकविना श्रीनारायणपण्डितेन विरचितस्य 'हितोपदेशस्य' मित्रलाभात् गृहीतोऽस्ति ।

गङ्गातटे अवस्थिते पाटलीपुत्रनामधेयस्य नगरस्य 'सुदर्शन' नामकस्य एकः नृपः आसीत् । तस्य पुत्राः अकर्मिकाः अधार्मिकाः अविद्वांसश्च आसन् । एकदा स भूपतिः केनापि पठ्यमानं श्लोकद्वयं श्रुत्वा स्वपुत्रान् प्रति चिन्तयामास ।

शब्दार्थाः -व्याकरणञ्च → उद्योगिनम् → उद्योगशीलम्, उद् + √युज् + घञ्, तम् । उद् + √युज् + घिनुण् ।

पुरुषसिंहं - पुरुषश्रेष्ठं, पुरुषः सिंहम् इव, कर्मधारयः । स्वयमेव । उपैति - निकटं आगच्छति । कापुरुषाः - कुत्सिताः पुरुषाः, प्रादि तत्पुरुषः । वदन्ति - कथयन्ति । अत्र - अस्मिन् विषये ।

उद्योगाभावे तिलेभ्यो तैलानि न आप्तुमर्हति । अतएव दैवस्य आशां विहाय पुरुषेण उद्योगम् अवश्यं कर्तव्यम् । लक्ष्मीः उद्योगिनं पुरुषं उपैति । अलसाः जनाः दैववशीभूताः भवन्ति । भाग्यक्रमेण धनानि भवन्ति यान्ति च, इत्थं कापुरुषाः वदन्ति किन्तु पुरुषार्थिनः जनाः परिश्रमं कुर्वन्ति । पश्चात् यदि सफलतां न प्राप्नुवन्ति तदा ते यत्ने कृते दोषान् अन्वेषयन्ति ।

09-06-2021

डॉ० निर्मलकुमार झा, स० प्राचार्य
रा० उ० सं० महावि० सरसेना पूर्णियाँ ।

09-06-2021

शास्त्री-I

शिशुपालवधम् । साहित्यम् ।

श्लोकव्याख्या ।

"स तप्तकार्तस्वरभास्वराम्बरः कठोरताराधिपलाञ्छनच्छविः ।
विदिद्युते वाडवजातवेदसः शिखाभिराश्लिष्ट इवाम्भसां निधिः ॥"

पद्यमिदं महाकविश्रीमाघप्रणीतस्य शिशुपालवधमहाकाव्य-स्य प्रथमसर्गात् उद्धृतम् । ऋषिनारदः गगनमार्गात् उपकृष्णम् वसुदेवसद्मनि आगच्छन् अस्ति । नारदपूजनान्तरं भगवान् श्रीकृष्णः स्वसिंहासने आरूढः अस्ति । तत्काले श्रीकृष्णः कीदृशं प्रतिभाति, अस्य वर्णनं कविः अत्र करोति ।

अन्वयः → तप्तकार्तस्वरभास्वराम्बरः कठोरताराधिपलाञ्छनच्छविः सः वाडवजातवेदसः शिखाभिः आश्लिष्टः अम्भसां निधिः इव विदिद्युते ।

व्याकरणम् → तप्तं च तत् कार्तस्वरश्च तप्तकार्तस्वरम्, तप्तकार्तस्वरमिव भास्वरमम्बरं यस्य सः तप्तकार्तस्वरभास्वराम्बरः (बहुव्रीहिः समासः) तात्पर्यं सुतप्तसुवर्णवत् उज्ज्वलवसनः ।
आशयः अस्ति यत् पीताम्बरं धारयन् श्रीकृष्णः ।
कठोरश्चासौ ताराधिपश्च कठोरताराधिपः, तस्य लाञ्छनं, तस्य छविः यस्य सः कठोरताराधिपलाञ्छनच्छविः (बहुव्रीहिः) = पूर्णचन्द्रचिह्न-द्युतिः । वडवायां भवः वाडवः, वाडवश्चासौ जातवेदाश्च वाडव-जातवेदाः तात्पर्यं वाडवाग्नेः । शिखाभिः = ज्वालाभिः । आश्लिष्टः = व्याप्तः । अम्भसां निधिः = जलनिधिः । इव = सदृशः ।
विदिद्युते - शुशुभे, बभौ ।
सुतप्तसुवर्णवत् पीतवस्त्रधारी, पूर्णचन्द्रचिह्नद्युतिः, भगवान् श्रीकृष्णः वाडवाग्नेर्ज्वालाभिर्व्याप्तः समुद्रेव शुशुभे । अत्रोपमालङ्कारः वंशस्थवृत्तञ्च ।

09-06-21

डॉ० निर्मल कुमार झा, स० प्राचार्य
रा०उ० सं० महावि० सुरवसेना, पूर्णियाँ ।

09-06-2021

साहित्यम् (प्रतिष्ठा) शास्त्री-III

अष्टम पत्रम् । मालविकाग्निमित्रे श्लोकव्याख्या ।

" कदा मुखं वरतनु कारणादृते तवागतं क्षणमपि कोपपात्रताम् ।
अपर्वणि ग्रहकलुषेन्दुमण्डला विभावरी कथय कथं भविष्यति ॥ "

कविकालिदासरचितोऽयं श्लोकः मालविकाग्नि-मित्रात् चतुर्थऽङ्कात् गृहीतः । राज्ञः अग्निमित्रस्य द्वितीया पत्नी इरावती राज्ञा सह मालविकायाः अभिसारः दृष्टः, अतएव सा कुपिता । राजा अग्निमित्रः तस्याः प्रासादार्थं अनुनयं करोति ।

अन्वयः → वरतनु ! तव मुखं कारणात् ऋते कदा क्षणमपि कोपपात्रताम् आगतम् ? विभावरी अपर्वणि ग्रहकलुषेन्दुमण्डला कथं भविष्यति ? कथय ।

शब्दार्थाः व्याकरणानि च → वरतनु = रमणीयगात्रि । तव मुखम् = भवत्याननम् । कारणात् ऋते = हेतुं विना । कदा = कस्मिन् काले । कोपपात्रताम् = क्रोधभाजनत्वम् । आगतम् = प्राप्तम् । विभावरी = रात्रिः । अपर्वणि = पूर्णिमातिरिक्ते समये । ग्रहकलुषम् = राहुसम्पर्कमलिनम् । इन्दुमण्डलम् = चन्द्रमण्डलम् । कथम् = केन प्रकारेण । भविष्यति = न कथमपि । कथय = वद । वरतनु → वरा तनुर्यस्या सा तत्सम्बुद्धौ । कोपपात्रताम् = कोपस्य पात्रम् तस्य भावः । ग्रहकलुषेन्दुमण्डला = ग्रहेण कलुषम् इन्दोः मण्डलं यस्यां सा ।

अलङ्कारः → दृष्टान्तः । "दृष्टान्तः पुनरेतेषां सर्वेषां प्रतिबिम्बनम् ।"

छन्दः → रुचिरा । "जभौ सजौ गिति रुचिरा चतुर्ग्रहैः ।"

[signature] 09-06-21

डॉ० निर्मल कुमार झा, स० प्राचार्यः ।
रा० उ० सं० महावि० खरवसेना पूर्णियाँ